# संस्कृत-वार्ता:

**दिनाङ्कः-07/10/2023**

**प्रात : 06:55**

**अमित शाह-वामपन्थ-अतिवादसमीक्षा-सम्मेलनम्**

गृहमन्त्री अमितशाहः उक्तवान् यत् विगतेषु वर्षेषु वामपन्थीय-अतिवादस्य न्यूनीकरणे सर्वकारेण सफलता प्राप्ता अस्ति, अधुना अयं युद्धः निर्णायकं चरणं प्राप्तवान् अस्ति। सः ह्यः नवदिल्लीनगरे वामपन्थीय-अतिवादस्य विषये समीक्षासम्मेलनस्य अध्यक्षतां कृतवान्। वामपक्षीय-उग्रवाद-प्रभावित-राज्यानां मुख्यमन्त्रिणः, उपमुख्यमन्त्रिणः, अन्ये च सम्बद्धाः अधिकारिणः अपि सभायां उपस्थिताः आसन् । गृहमन्त्री स्वसम्बोधने अवदत् यत् सर्वकारस्य शून्यसहिष्णुतानीतेः फलस्वरूपं विगतेषु चतुर्दशकेषु गते वर्षे हिंसायाः , मृत्यूनां च न्यूनतमस्तरः अभिलेखितः ।

**सिक्किम-आपदा**

सिक्किमस्य मुख्यमन्त्री श्री प्रेमसिंह तामाङ्गः उक्तवान् यत् उद्धारकार्यक्रमाः पूर्णरूपेण प्रचलन्ति तथा च विस्थापितपरिवाराः शीघ्रमेव सामान्यतायाः मार्गे स्थापिताः भवेयुः इति सुनिश्चित्य आपदुद्धारदलानि सर्वान् प्रयत्नान् कुर्वन्ति सन्ति। मुख्यमन्त्री ह्यः आपदाप्रभावितक्षेत्राणां भ्रमणं कृतवान्। मुख्यमन्त्री मृतानां परिवारेभ्यः चतुर्लक्षरूप्यकाणां अनुग्रहराशेः घोषणां कृतवान्।

तत्रैव केन्द्रसर्वकारेण जलाप्लवनेन ग्रसिताय सिक्किम-राज्याय आपत् सहयोगरूपेण पञ्चचत्वारिंशत् कोटिरूप्यकाणां सहयोगः स्वीकृतः अस्ति। राशिरयं अस्मै सत्राय राज्य-आपदुद्धार-सहयोग-कोषात् केन्द्रीय पक्षतः भागराशिः अस्ति । केंद्रीय-गृहमंत्रालयेन हानेः आकलनाय एकम् अन्त:मंत्रालयीय केन्द्रीय दलम् घटितमस्ति। गृह मंत्रालयेन ज्ञापितम् यत् दलमिदं शीघ्रमेव सिक्किमस्य जलाप्लवितक्षेत्राणां यात्रां विधास्यति, अस्याकलनाधारेण राज्याय अतिरिक्तकेन्द्रीय सहायताऽपि स्वीकरिष्यते।

**ईसीआई- पर्यवेक्षक-सभा**

निर्वाचन-आयोगेन ह्यः मिजोरम-छत्तीसगढ-मध्यप्रदेश- राजस्थान- तेलंगानासु च विधानसभानिर्वाचनार्थं नवदिल्लीनगरे सामान्याधिकारिणाम् आरक्षिणां व्ययपर्यवेक्षकाणां कृते संक्षिप्तसम्मेलनस्य आयोजनं कृतम्। मुख्यनिर्वाचन-आयुक्तः राजीवकुमारः सभां सम्बोधयन् स्वतन्त्रं, निष्पक्षं, प्रोत्साहनमुक्तं च निर्वाचनं सुनिश्चेतुं समन्वितरूपेण कार्यं कर्तुं समन्वितक्षेत्रं सुनिश्चितं कर्तुं च आयोगस्य पर्यवेक्षकान् निर्देशितवान्।

**मौद्रिकनीतिः/आरबीआई**

भारतीय-रिजर्व-बैंक इत्यस्य मौद्रिकनीतेः समीक्षोपवेशने 'रेपो रेट्' इत्यस्मिन् परिवर्तनं विनैव सार्धषट्प्रतिशतस्य गणनाङ्कः पूर्ववदेव स्थापितोऽस्ति। उपवेशनमिदं आर.बी.आई इत्यस्य मौद्रिकनीतिसमित्याः द्विमासिकोपवेशनम् आसीत्। यस्मिन् प्रतिदानप्रतिशततायाः विषये निर्णयो नीतः। मुम्बई-समित्याः उपवेशनान्तरं आरबीआईप्रमुखेण शक्तिकान्त-दासेन प्रोक्तं यत् ऋणप्रतिदानम् अपरिवर्तितमेव स्थास्यतीति।

आरबीआई-पक्षत: प्रसारितवक्तव्यानुसारं व्यापकरूपेण आर्थिक-वित्तीयानाञ्च घटनाक्रमणां विस्तृतानुशीलनानन्तरं समित्या सातत्येन चतुर्थे द्विमासिकोपवेशनेऽपि प्रतिदानराशे: प्रतिशतं यथावदेव स्थापितम्।

**मुम्बई-अग्निकाण्डम्**

मुम्बई-नगरे गोरेगांव इत्यत्र आजादोद्यानस्य समीपे एकस्मिन् सप्त-तलात्माके भवने ह्यः प्रात: अग्निकाण्डे सप्त-जना: मृत्युमुपगता:, चत्वारिंशत् जनाश्च व्रणिता:। पञ्च जनानां स्थिति: गम्भीरा अस्ति इति उच्येत। एक-पञ्चाशत् जना: संरक्षिता। भवनस्य अद्य आपणे सामग्रिषु, वाहनेषु च अग्निदोषम् जायत।

**नोबेल-शान्ति-पुरस्कार:/नर्गेस**

ईरानस्य मानवाधिकार-कार्यकर्त्री नर्गिस-मोहम्मदी इत्यस्यै महिलानां-उत्पीडनं विरुध्य संघर्षाय विंशति: त्रयोविंशति: वर्षस्यास्य नोबेल-शान्ति-पुरस्कार: प्रदत्त:। सा सम्प्रति कारागारे एवास्ति, सा नोबेल पुरस्कार: प्राप्तकर्त्री ऊनविंशति तमा महिला अस्ति। सा ईरानस्य प्रमुखेषु मानवाधिकार कार्यकर्तृषु अन्यतमास्ति। सुश्री-मोहम्मदी त्रयोदश-बारं कारागृहं गता, पञ्च-बारं तस्यां दोषा: सिद्धा:, आहत्य एकत्रिंशत् वर्षाणि यावत् कारागृहगमनेन सह विभिन्नै: दण्डै: दण्डिता। नॉर्वे देशीयेन-नोबेल समित्या ईराने महिलोत्पीडनं विरुध्य संघर्षाय, सर्वेषां कृते मानवाधिकाराय, च नर्गिस मोहम्मदी इत्यस्यै पुरस्कार-प्रदानस्य निर्णय: कृत:।

**एशियाई क्रीडाः :**

चीनदेशस्य हांग्चोओ-नगरे समायोज्यमानायां एशियाईक्रीडायां भारतेन आहत्य ऐतिहासिकरूपेण पञ्चनवतिः(95) पदकानि सञ्चितानि, येषु 22 स्वर्णपदकानि, 34 रजतपदकानि, 39 कांस्यपदकानि च सन्ति सम्प्रति पदकगणनायां भारतं चतुर्थस्थाने अस्ति । भारतं स्वस्य 100 पदकानां लक्ष्यं प्रति द्रुतगत्या वरीवर्धते।

पुरुषक्रिकेट्-क्रीडायां भारतम् अद्य अन्तिमचक्रीय-क्रीडायां अफगानिस्तानं विरुध्य क्रीडिष्यति

**विश्वचषकक्रिकेट्स्पर्धा**

विश्वकपक्रिकेटप्रतियोगितायाम् अद्य बांग्लादेश-अफगानिस्तानयोः मध्ये स्पर्धा भविष्यति ।

**।। ति वार्ता: ।।**